रजकः किं करिष्यति" पञ्चत० भावे ल्युट्। २क्षेपणे "स-ब्रह्मचारिणेऽर्काह्मतीते क्षपणं स्मृतम्" "भुक्तातोऽन्य-तमस्वान्नमनया क्षपणं त्र्यहम्" मनुः कर्त्तरि ल्यु। ३क्षपके त्रि० "चरितानि यत्र गायन्ति लोकशमलक्षपणा-नि भक्ताः" भाग० ३।१५।७० श्लो०

**क्षपणी** स्त्री क्षप-कर्म्मणि ल्युट् ङीप्। क्षेपण्याम् अमरटी०

**क्षपण्यु** क्षप-बा० अन्यु। अपराधे शब्दमा०।

**क्षपा** स्त्री क्षपयति चेष्टाम् क्षप-अच्। १रात्रौ २हरिद्रायां च अमरः "क्षपातमस्काण्डमलीमसं नभः"। "प्रतिक्षपं ह-र्म्यतलेषु यत्र" माघः "दिनक्षपामध्यगतेव सन्ध्या" रघुः।

**क्षपाकर** पु० क्षपां करोति कृ-ट। १चन्द्रे २कर्पूरे च अमरः क्विप् क्षपाकृदप्यत्र। "विशदाश्मकूटघटिताः क्षपाकृतः" माघः

**क्षपाचर** पुं स्त्री० क्षपायां चरति चर-ट। १राक्षसे "निर्याणे च मतिं कृत्वा निशायामसि क्षपाचरः" भा० व० २८८अ०। स्त्रियां जातित्वात् ङीष्। २रात्रिचरमात्रे त्रि०

**क्षपाट** पुं स्त्री० क्षपायामटति अट-पचा० अच्। १राक्षसे "ततः क्षपाटैः पृथुपिङ्गलाक्षैः" भट्टिः स्त्रियां ङीष्।

**क्षपानाथ** पु० ६त०। १चन्द्रे २कर्पूरे च "क्षिप्रं क्षपानाथ इवा-भिरूढः" माघः क्षपापत्यादयोऽप्यत्र।

**क्षम** सहने भ्वादि० आत्म०सक०वेट्। क्षमते अक्षमिष्ट अक्षंस्त चक्षमे क्षान्तः क्षान्तिः। क्षमिता क्षन्ता। "इन्द्र त्वा यज्ञः क्षममाणमानट्" ऋ० १०।१०४।६। योनित्यं क्षमते तात! बहून् लोकान् स विन्दति" भा० व० १८२५ श्लो०। "का-र्पण्यात् साधुभावाच्च कुन्ती राजन्न चक्षमे" भा० आ० १५७ अ०। "कृते रक्षेः क्षालयितुं क्षमेत कः" माघः "कुरुष्व मा भीरु! यत्तेभ्योद्रुह्यन्तोऽपि क्षमामहे" भट्टिः। षित् क्षमा "तेजः क्षमा वानैकान्तम्" माघः वैदिके तु नि० क्षमति क्षमिति। इति भा।

**क्षम** सहने दिवा० पर०सक०सेट् शमादि० इरित्। क्षाम्यति अक्षमत् अक्षमीत्। चक्षाम "कामं क्षाम्यतु यः क्षमी" माघः।

**क्षम** न० क्षम-अच्। १युक्ते। २शक्ते, "रक्षितुं सहितुं रणे—काकुत्स्थ भीरु! कः क्षमः" भट्टिः आत्मकर्म-क्षमं देहम्" रघुः "प्रियासु बालासु रतक्षमासु" च नैष० ४क्षमावति त्रि० "अतोऽत्र किञ्चिद्भवतीं बहुक्षमाम्" "शंसिते, किञ्चित् भवतीं बहुक्षमाम्" कुमा०।

**क्षमता** स्त्री० क्षमस्य भावः तल्। १योग्यतायां, शब्दनिष्ठ २अर्थप्रकाशनसामर्थ्ये च "श्रुतिर्द्वितीया च क्षमता च लिङ्गम्" भट्टकारिका।

**क्षमा** स्त्री क्षम-अङ्। "बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित्। न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता" "आक्रुष्टोऽभिहतो वापि नाक्रोशेन्न च हन्ति वा। अदुष्टैर्वाङ्मनःकायैस्तितिक्षोः सा क्षमा मतेति" चोक्त-लक्षणायाम् तितिक्षायाम्, चित्तवृत्तिभेदे, "आक्रुष्टोऽ-भिहतो यस्तु नाक्रोशेन्न हनेदपि। अदुष्टैर्वाङ्मनःकायै-स्तितिक्षुः क्षमा स्मृता" मात्स्ये १२० अ०। "विभा-गशीलः सततं क्षमायुक्तोदयान्वितः गृहस्थः स्यात् क्षमायुक्तो न गृहेण गृही भवेत्" "क्षमा दया च विज्ञानं सत्यञ्चैव दमः शमः। अध्यात्मनिरता विज्ञानं ज्ञानमेतद् ब्राह्मणलक्षणम्। विगर्हातिक्रमो हिंसाब-न्धवधात्मनाम्। अन्यमन्युसमुत्थानां दोषाणां वर्ज्जनं क्षमा" कूर्म्म पु० १४अ०। २भूमौ च। अमरः। क्षान्तौ अव्य० स्वरा०। पृथ्वी० क्षाम् क्षमा क्षा क्षमि क्षामा इत्यादयोऽपि निघण्टौ क्षमायां पठिताः। "क्षाम तुभ्यं हन्ता अप क्षत महना मनाप्त द्यौः" ऋ० ४।१७।१। "द्यौ-र्क्ष्माज्जनिमन्वेजत्क्षाः" ४।२२।४ "अजो न क्षां दा-धार पृथिवीम्" ऋ० ४।६७।५ "क्षां दासायोपबर्हणीं कः" १।१७४।६ "सुहृदयो वर्तते यन्नभि क्षाम्" १।१८३।२ "दिवि क्षमा च" ५।५२।३। "क्षमा मन्महे रपो विश्वं नो अस्तु भेषजम्" अथ० ६।५७।२ "अभिक्षमि विश्वरूपं यदस्ति" ऋ० ७।२७।२ "अग्निर्यद्रोधति क्षमि" ऋ० ४।४३।६। "स परिक्षा त्वक्षसा क्ष्मो दिवश्च" १।१००।१५ "द्यावाक्षामा" ऋ० १।९६।५ "तुरगरसयति कौन्ततीरः क्षमा" वृ० र० उक्ते ३त्रयोदशाक्षरपादके छन्दोभेदे स्त्री "दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा" नमोऽस्तु ते" ४इत्युक्ते दुर्गाशक्तिभेदे ५राधिकासहचरीभेदे "मया पूर्व्वन्तु त्वं दृष्टो गोप्या च क्षमया सह" "क्षमा देहं परित्यज्य लज्जया पृथिवीं गता" ब्रह्मवैपु० प्रकृ-तिख० ९अ०। ६खदिरे राजनि०

**क्षमाज** पु० क्षमातोजायते जन+ड ५त०। १मङ्गले २नरकासुरे ३भूजातमात्रे त्रि० क्षमाजातादयोऽप्यत्र

**क्षमादंश** पु० क्षमायाः दंश इव। शिग्रुवृक्षे राजनि०

**क्षमापि** क्षमं क्षमान्वितं करोति क्षम-णिच् सत्या० पुक् दीर्घश्च। क्षमापयति ते अचि(च)क्षमापत् न क्षमापयाम्-बभूव आस चकार चक्रे। "तन्निमित्तं ब्राह्मणं क्षमा-पयति हेतुवचनोक्त्या" छा० उ० भा०। "क्षमापय महाभागं ततः शान्तिर्भविष्यति" भाग० ६।४।५२ श्लो०